# आलंकारिकभामहकृतस्य बौद्धदर्शनसम्मतप्रत्यक्षप्रमाणखण्डनस्य तात्पर्यविश्लेषणम्

ड. अञ्जन-दासः

Abstract:
संस्कृतकाव्यशास्त्रे काव्यदोषनिरूपणस्य सरणिद्वयं विद्यते- आचार्य-आनन्दवर्धनमते रसस्य अपकर्षको हि दोषः। परन्तु भामह-दण्डी-वामनादिनये गुणविपर्ययो हि दोषः। दोषः अष्टादशविधः। भमहेन तेषु पञ्चदश दोषाः चतुर्थाध्याये अलोचिताः; परन्तु प्रतिज्ञाहीनं, हेतुहीनं दृष्टान्तहीनञ्चेति दोषत्रयं 'न्यायनिर्णय'नामके पञ्चमपरिच्छेदे विवृतम्। अन्तिमदोषत्रयस्य स्वरूपं न्यायदर्शनदिशा निरूपितं, यतः वयं जानीमः न्यायदर्शने अनुमानं स्वार्थानुमान-परार्थानुमानभेदेन द्विविधं तत्र च अनुमानद्वये कति अवयववाक्यानि वर्तन्ते। यथा प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनानि पञ्चावयवाः। वस्तुतस्तु दृश्यते तदैव अनुमितिरुत्पद्यते यदा अवयववाक्यानि विद्यन्ते। अत एव वक्तुं शक्यते न्यायदर्शने यथा प्रतिज्ञादिवाक्यानि विना अनुमितिः न जायते तदैव काव्येऽपि प्रतिज्ञा-हेतु-दृष्टान्तान् विहाय काव्यस्य परिपूर्णत्वरूपं न सिद्धं भवति। तस्मात् भामहाचार्यैः न्यायमतमवलम्ब्य अन्तिमदोषत्रयस्यालोचनावसरे प्रमाणस्यालोचना कृता। तत्रादौ प्रत्यक्षप्रमाणस्वरूपविचारे बौद्धमतं खण्डितम्। कथं तेन बौद्धमतं न स्वीकृतमिति विचार्यविषयः। स विषयः युक्त्या मया उपस्थापितः मम शोधप्रबन्धे।

Keywords: दोषः, प्रमाणम्, प्रत्यक्षम्, न्यायविन्दुः, तर्कसंग्रहः, न्यायमञ्जरी, काव्यालंकारः

प्रपूर्वकात् माधातोः करणवाच्ये ल्युटि प्रमाणशब्दस्य निष्पत्तिर्जायते। प्रमायाः करणं प्रमाणमिति प्रमाणसामान्यलक्षणम्। वस्तुतः तद्वति तत्प्रकारकोऽनुभवो यथार्थः सैव प्रमेत्युच्यते। नैयायिकप्रवरैः अन्नंभट्टपादैः अनुरूपमेवोक्तम्- "तद्वति तत्प्रकारकानुभुवो यथार्थः। यथा 'अयं घटः' इति ज्ञानम्"[1] इति। यथा प्रत्यक्षज्ञाने इन्द्रियं प्रमाणम्, अनुमितौ लिङ्गदर्शनं प्रमाणम्, उपमितौ

सादृश्यज्ञानं प्रमाणम्, शाब्दे च वेदाः प्रमाणमिति शब्द: प्रमाणम्। अत्रेदं बोध्यम्। इन्द्रियसंयोगादिरेव प्रमाकरणम्। न तु प्रमातृप्रमेयादीनि। बौद्धनये प्रमाणं हि अविसंवादिज्ञानम्। प्रमाणमिदं कतिविधमिति विषये दार्शनिकानां मध्ये मतभेदो विद्यते। तत्र चार्वाकाः प्रत्यक्षमेव प्रमाणं स्वीकुर्वन्ति, बौद्ध-वैशेषिकास्तु प्रत्यक्षमनुमानञ्चेति प्रमाणद्वयमिति, सांख्याश्च प्रत्यक्षमनुमानं शब्दश्चेति, नैयायिकाश्च पुनः प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि वदन्ति, मीमांसका वैदान्तिकाश्च ते पुनः प्रमाणं षड्-विधं स्वीकुर्वन्ति प्रत्यक्ष-अनुमान-उपमान-शब्द-अर्थापत्ति-अनुपलब्धिभेदात्। तदुक्तं तार्किकरक्षायाम्-

प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः।
अनुमानञ्च तच्चाथ सांख्याः शब्दञ्च तेऽपि॥
नैयायिकदेशिनोऽप्युपमानञ्च केचन।
अर्थापत्त्या सहैतानि चत्वार्याह प्रभाकरः॥
अभावषष्ठान्येतानि भाट्टा वेदान्तिनस्तथा॥[2]

आलंकारिकभामहैः तदीये 'काव्यालंकारः' इति ग्रन्थे बौद्धदर्शनानुसारं प्रमाणं द्विविधं स्वीकृतं प्रत्यक्षानुमानभेदेन।[3] परन्तु बौद्धानां प्रत्यक्षस्वीकारपद्धतिः तैः खण्डिता। यतः तैः बौद्धसविकल्पकप्रत्यक्षं न स्वीकृतम्, पुनश्च तेषां प्रत्यक्षलक्षणमपि भ्रान्तमिति भामहादयः आचार्या वदन्ति। तदुक्तं भामहैः तदीये काव्यालंकारे-

प्रत्यक्षं कल्पनापोढं ततोऽर्थादिति केचन।
कल्पनां नाम जात्यादियोजनां प्रतिजानिते॥[4]

प्रत्यक्षलक्षणविश्लेषणात्पूर्वं कतिपयाः प्रश्नाः सन्ति- प्रथमो हि कथं भामहाचार्यैः आलंकारिके सत्यपि तथाकथितदार्शनिकवत् तैः प्रमाणविषय आलोचितः? द्वितीयः खलु कथं वा केवलं बौद्धानां प्रत्यक्षलक्षणं खण्डितम्? तृतीयस्तु कथं विविधेषु दर्शनेषु केवलं न्यायमतमवलम्ब्य प्रत्यक्षलक्षणमालोचितम्? एतेषां प्रश्नानां समाधानमेकैकतया आलोच्यते अधस्तात्-

i) आचार्यैः भामहैः काव्यालंकारस्य चतुर्थपरिच्छेदस्य नामकरणं कृतं 'दोषनिर्णय' इति। वस्तुतः काव्यस्य दोषो भवति काव्यास्वादसमये सहृदयानां हृदयतः जात उद्वेगः- 'उद्वेगजनको दोषः' इति। संस्कृतकाव्यशास्त्रे दोषनिरूपणस्य सरणिद्वयं

विद्यते- आचार्य-आनन्दवर्धनमते रसस्य अपकर्षको हि दोषः। परन्तु भामह-दण्डी-वामनादिनये गुणविपर्ययो हि दोषः- 'गुणविपर्ययात्मनो दोषाः', 'एत एव विपर्ययस्ता गुणाः काव्येषु कीर्तिताः' इति। सोऽसौ दोषः अष्टादशविधः-

अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम्।
शब्दहीनं यतिभ्रष्टं भिन्नवृत्तं विसन्धि च॥
देशकालकलालोकन्यायागमविरोधि च।
प्रतिज्ञाहेतुदृष्टान्तहीनं दुष्टं च नेष्यते॥[5]

एतेषु दोषेषु पञ्चदश दोषाः चतुर्थाध्याये अलोचिताः; परन्तु प्रतिज्ञाहीनं, हेतुहीनं दृष्टान्तहीनञ्चेति दोषत्रयं 'न्यायनिर्णय' नामके पञ्चमपरिच्छेदे विवृतम्। अन्तिमदोषत्रयस्य स्वरूपं न्यायदर्शनदिशा निरूपितं, यतः वयं जानीमः न्यायदर्शने अनुमानं स्वार्थानुमान-परार्थानुमानभेदेन द्विविधं तत्र च अनुमानद्वये कति अवयववाक्यानि वर्तन्ते। यथा प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनानि पञ्चावयवाः। वस्तुतस्तु दृश्यते तदैव अनुमितिरुत्पद्यते यदा अवयववाक्यानि विद्यन्ते। अत एव वक्तुं शक्यते न्यायदर्शने यथा प्रतिज्ञादिवाक्यानि विना अनुमितिः न जायते तदैव काव्येऽपि प्रतिज्ञा-हेतु-दृष्टान्तान् विहाय काव्यस्य परिपूर्णत्वरूपं न सिद्धं भवति। तस्मात् भामहाचार्यैः न्यायमतमवलम्ब्य अन्तिमदोषत्रयस्यालोचनावसरे प्रमाणस्यालोचना कृता।

ii) बौद्धदार्शनिकानां नये प्रत्यक्षं नाम कल्पनाशब्दवाच्यनामजातिरूपादिरहितं ज्ञानम्- 'प्रत्यक्षं कल्पनापोढं नामजात्याद्यसंयुतम्'। अस्य मतस्य व्याख्या नैयायिक-उद्योत्करेण एवं कृतम्- 'अथ केयं कल्पना? नामजातियोजनेति, यत् किल न नाम्ना अभिधीयते, न च जात्यादिभिर्व्यपदिश्यते, विषयस्वरूपानुविधायि परिच्छेदकमात्मसंवेद्यं तत्प्रत्यक्षम्; इति। परन्तु धर्मकीर्तिना प्रत्यक्षं नाम कल्पनारहितं प्रमात्मकं ज्ञानम् इति उक्तं- 'कल्पनापोढमभ्रान्तं प्रत्यक्षम्'[6] इति। प्रत्यक्षात्मकज्ञानस्य इदमेव प्रधानं स्वरूपं यत् तादृशं ज्ञानं यथार्थं स्यात्। तद्धि बौद्धिकपदार्थे 'कल्पना' परपर्यायैः रहितं स्यात्। यतः प्रत्यक्षं हि साक्षाज्जायमानं ज्ञानम्। यदि नैयायिकवत्, प्रत्यक्षं इन्द्रियार्थसन्निकर्षजन्यं ज्ञानमित्युच्यते, तर्हि मानसप्रत्यक्षस्य प्रत्यक्षत्वमेव न स्यात्। तस्मात् कस्यचिद्वस्तुनः साक्षादनुभव एवं

प्रत्यक्षमिति वक्तव्यम्। यथोक्तम्– 'साक्षात्कारिज्ञानम् प्रत्यक्षम्' प्रत्यक्षं कल्पनारहितं स्यादिति प्रोक्तम्। तर्हि कल्पनाशब्दस्य निष्कृष्टार्थः क इति किञ्चिद्विवेचनीयम्। धर्मकीर्तिस्तु, किञ्चिद्वस्तुवाचकं नामैव कल्पनाशब्दवाच्यं इति अभिप्रैति। 'नाम' हि प्रत्यक्षे विषयतया भासमानानां वस्तूनां मनसा क्रियमाणा काचन संज्ञा। तस्मात् प्रत्यक्षं नामसंबन्धरहितं स्यात्। प्रत्यक्षं चतुर्विधम् इन्द्रियज्ञानं, मनोविज्ञानं, स्वसंवेदनं योगिप्रत्यक्षं चेति- 'भूतार्थ-भावनाप्रकर्षपर्यन्तजं योगिज्ञानञ्चेति'[7]। मनोविज्ञानं च चतुर्भिः कारणैर्भवति- प्रथमम् आलम्बनप्रत्ययः, यथा बाह्यपटादिवस्तु। द्वितीयम् सहकारिप्रत्ययः, यथा चाक्षुषप्रत्यक्ष आलोकः। तृतीयम् अधिपतिप्रत्ययः, यथा इन्द्रियम्। चतुर्थं अव्यवहितपूर्वक्षणवृत्तिप्रत्यक्षात्मकं ज्ञानम्। स्वसंवेदनन्तु मनसः, मनोऽवस्थाविशेषरूपाणां सुखदुःखादीनां च अनुभवः। बुद्धप्रोक्तचतुर्विधासार्यसत्यविषयकानवरततीव्रध्यायेन सत्यविषयक-साक्षाज्ज्ञानमेव योगिप्रत्यक्षम्। अत्रेदमवधेयं यत् बौद्धनये योगीनां निर्विकल्पकं प्रत्यक्षमेव प्रमाणम्। तथा चोक्तम्- 'तच्च ज्ञानरूपं वेदनमात्मनः साक्षात्कारि निर्विकल्पकमभ्रान्तम्' इति। यतः कस्यापि सविकल्पकप्रत्यक्षं भवितुं नार्हति।

क्षणभङ्गवादिनः बौद्धसम्प्रदायस्य मते प्रत्यक्षस्य प्रतिपाद्यविषयो हि क्षणिकः अर्थात् यस्मिन क्षणे तस्य विषयस्य उत्पत्तिर्भवति, तदव्यवहितं परं तस्य विनाशो जायते तदनन्तरं तज्जातीयोऽपरविषय उत्पद्यते। अत एव तस्य विषयस्य उत्पत्तेः परक्षणे एव तस्य प्रत्यक्षे जाते तत्र अव्यवहितपूर्वविषयः कारणं भवितुमर्हति। परन्तु तत्परं सविकल्पकप्रत्यक्षस्याव्यवहितं पूर्वं तद्विषयः अविद्यमानत्वात् तत्र प्रत्यक्षे तद्विषयः कारणं भवितुं नार्हति। तदर्थं बौद्धाः सविकल्पकप्रत्यक्षं न स्वीकुर्वन्ति असद्विषयकत्वात्। तेषां नये प्रथमोत्पन्नं निर्विकल्पकप्रत्यक्षमेव प्रमाणं सद्विषयकत्वात्- 'ततोऽर्थाद्विज्ञानं प्रत्यक्षम्' इति।

परन्तु नैयायिका आलंकारिकाश्च प्रत्यक्षं सविकल्पक-निर्विकल्पकभेदेन स्वीकुर्वन्ति। नैयायिकानां नये सविकल्पकप्रत्यक्षं नाम सप्रकारकं ज्ञानम् अर्थात् नामजात्यादिविशेषणविशेष्यसम्बन्धावगाहि ज्ञानमिति। यथा ब्राह्मणोऽयम्, श्यामोऽयम् इति। मूकजनान् विना सर्वेषां सविकल्पकज्ञानं भवेदिति तेषामाशयः। परन्तु वयं पश्यामः बौद्धाः सविकल्पकज्ञानं न स्वीकुर्वन्ति असद्विषयकत्वात्।

एतन्मतं न यथार्थं नैयायिकदिशा आलंकारिकदिशा च। कथं न यथार्थं प्रथमे नैयायिकमतस्य तात्पर्यं मया व्याख्यायते- तेषां नये बौद्धानां 'कल्पना'पदस्य अर्थो हि नामजातियोजनेति, यत् किल न नाम्नाभिधीयते, न च जात्यादिभिर्व्यपदिश्यते, विषयस्वरूपानुविधायि परिच्छेदकमात्मसंवेद्यं तत्प्रत्यक्षमिति। यदि एवं प्रत्यक्षशब्दस्यार्थो भवेत्तर्हि नाम्ना अवाच्यमिति न वक्तुं शक्यते। अपि च यदि बौद्धनये प्रत्यक्षशब्दस्य कोऽपि अर्थो न स्यात्तर्हि प्रत्यक्षशब्दोऽवाचकः भवेत्। फलस्वरूपं 'कल्पनापोढम्' इति प्रयोगः व्यर्थः। तच्छब्दः 'अश्वकर्णः', 'आकाशकुसुमम्' इत्यादिशब्दवत् कापि व्युत्पत्तिर्नास्ति। पुनश्च 'कल्पनापोढं प्रत्यक्षम्' इति वाक्यस्य अभिधेयः कः? तदपि वक्तव्यम्। यदि उक्तरूपं ज्ञानमेव अभिधेयमुच्यते तर्हि प्रत्यक्षम् अवाच्यं वक्तुं न शक्यते। तदुक्तं न्यायवार्तिके- 'न चाभिधेयमिति कोऽन्यो भदन्ताद्वक्तुमर्हति' इति। अपि च, जयन्तभट्टैः सविकल्पकप्रत्यक्षस्य प्रामाण्यं स्वीकृत्य बौद्धमतं खण्डितम्-

तस्माद्यत् कल्पनापोढपदं प्रत्यक्षलक्षणे।
भिक्षुणा पठितं तस्य व्यवच्छेद्यं न विद्यते॥[8]

वस्तुतः दिङ्नागस्यातिव्यापकतयाऽलक्षणं, कीर्त्तेस्तु अव्यापकतया, विकल्पप्रत्यक्षानवरोधात्, तस्य च प्रत्यक्षत्वव्युत्पादनात् अनिष्टमात्रस्य अतिप्रसङ्गकत्वादिति न्यायसिद्धान्तः।

अथ आलंकारिकैः भामहाचार्यैः बौद्धमतस्य खण्डनमालोच्यते-

बौद्धमतानुसारं कल्पना किल नाम-जाति-गुण-क्रिया-द्रव्यात्मिका उपाधिः। कल्पनाशब्दस्य सरलार्थो हि अयथार्थः अवास्तविको वा। तथाहि बौद्धानामभिप्रायः यत् यस्य वास्तविकत्वं नास्ति तस्य प्रत्यक्षं न जायते। तदर्थं तैः सविकल्पकं प्रत्यक्षं न स्वीकृतम्, तेषां नये अवास्तविकस्याधारो हि कल्पना। बौद्धानां मतमिदं भामहैः खण्डितम्–

प्रथमयुक्तिः- प्रत्यक्षं तस्यैव वस्तुनः भवति यस्य वास्तविकत्वमस्ति इति मतं सत्यम्, परन्तु नामजात्यादीनामुपाधीनां वास्तविकत्वं निषेधे सति वस्तुनः ज्ञानं केन मार्गेण भवेत्? अर्थात् पदार्थानां भिन्नत्वं केनोपायेन भवेत्? यथा राम-श्याम-घट-पट-जलादीनां पृथकत्वं न भवेत्, यदि सविकल्पकं प्रत्यक्षं न स्वीक्रियते। अपि च, दूरस्थितं

पदार्थं दृष्ट्वा अस्माभिर्न निश्चयितुं शक्यते अयं पदार्थः छागः न कुक्कुरः न वा श्र्गाल? परन्तु तदा अस्माकं निर्विकल्पकं प्रत्यक्षं भवति, तथापि न वक्तुं शक्यते अयं छागः वा कुक्कुरः वा श्र्गाल इति, यतः सविकल्पकप्रत्यक्षस्यास्वीकारात्। तदुक्तं भामहैः-

समारोपः किलैतावान् सदर्थालम्बनं च तत्।
जात्याद्यपोहे वृत्तिः क्व क्व विशेषः कुतश्च सः॥ [9]

द्वितीययुक्तिः– बौद्धानां मतं हि यदा वयं किमपि शब्दं वदामः तदा अस्माकं मनसि प्रतिपाद्यविषयात्मकः पदार्थः नागतः, वस्तुतः तस्मिन् समये प्रतिपाद्यविषयात्मकभिन्नपदार्थस्य व्यावृत्तिर्भवति प्रतिपाद्यविषयात्मकपदार्थश्च अव्यावर्त्तकत्वेन तिष्ठति। यथा यदा पद्मपुष्पस्याकाङ्क्षा क्रियतेऽस्माभिः तदा पद्मभिन्नपुष्पाणामपसारणं स्वत एव भूत्वा केवलं पद्मपुष्पं तिष्ठति। अस्यैव शाब्दबोधो जायते। वस्तुतः तेषामभिप्रायः शाब्दबोधे जात्याद्युपाधीनां कापि आवश्यकता नास्ति।

मतमिदं भामहाचार्यैः खण्डितम्, तन्मते यद्यपि जात्याद्युपाधीनाम् अपोहः अतद्व्यावृत्तिर्वा बौद्धानाभिप्रायो भवति, तथापि जात्यादीनां प्रतीतिर्भवेत्। तत्र प्रतीतेर्निवारणं कदापि कर्तुं न शक्नुयात्। बौद्धमते पद्मपुष्पस्य प्रतीतिः अपोहेन सम्भवति न तु जात्यादिना; परन्तु तन्न, यतः पद्मपुष्पे 'पद्मपुष्पत्वम्' जातिर्विद्यते। जातिशब्दस्य नामान्तरं हि सामान्यम्। सामान्यं नाम नित्यमेकमनेकानुगतमिति। अत एव सामान्येन 'पद्मपुष्पः' एवं प्रतीतिर्भवेत्। तदुक्तं काव्यालंकारे-

तदपोहेषु च तथा सिद्धा सा बुद्धिगोचरा।
अवस्तुकं चेद्वितथं प्रत्यक्षं तत्त्ववृत्ति हि॥ [10]

तृतीययुक्तिः–वयं जानीमः यदा एकस्माज्ज्ञानाद् अपरं ज्ञानं प्राप्यते, तदा प्रथमं ज्ञानं भवेद् ग्राह्यज्ञानं द्वितीयञ्च ग्राहकज्ञानमिति। बौद्धमतानुसारं 'गो' इत्यस्य ज्ञाने गोप्राणिनः ज्ञानं ग्राह्यज्ञानं भवति, गोव्यावर्तकज्ञानं खलु ग्राहकज्ञानमिति। अर्थात् 'गो' इत्यस्य ज्ञानाय गोव्यावर्तकज्ञानमपरिहार्यम्, तत्तु अपोहेन सम्भवेत्। अत्रेका समस्या भवेत्– पक्षद्वये 'गो'इति शब्दः सामान्यत्वेन विद्यते; यदि ग्राह्यज्ञानतः ग्राहकज्ञानतश्च 'गो' इत्यस्य शब्दस्य विच्छेदः क्रियते तर्हि एकमेव ज्ञानं हि ग्राह्यं यथा भवेत् तथा ग्राहमपि भवेत्। अत एव ग्राह्यज्ञान-ग्राहकज्ञानयोरभेदेन लोकव्यवहारः

विनष्टः स्यात्। तदुक्तं भामहैः-

ग्राह्यग्राहकभेदेन विज्ञानांशो मति यदि।
विज्ञानमत्र सादृश्याद्विशेषोऽस्य विकल्पना॥ [11]

चतुर्थयुक्तिः– कस्यचिद् वस्तुविशेषस्य ज्ञानं उक्तवस्तुना हि भवेत् न भिन्नवस्तुना इति सर्वजनविदितं सत्यम्। यथा पद्मपुष्पस्य ज्ञानं पद्मपुष्पेणैव भवेत् कदापि पद्मभिन्नपुष्पैर्न सम्भवेत्। एवमुदाहरणं वामनाचार्यस्य काव्यालंकारसूत्रवृत्तिग्रन्थस्य रीतेरालोचनायां प्राप्यते- 'न शनसूत्रवानाभ्यासे त्रसरसूत्रवानवैचित्र्यलाभः' अर्थात् शनसूत्रवयने त्रसरसूत्रवयनस्यापेक्षा न वर्तते, तत्र शनसूत्रवयनस्य अभ्यासस्य प्रयोजनीयतास्ति। तद्रूपं पद्मपुष्पस्य ज्ञानाय कोऽपि यदि कुमुदिनीपुष्पस्य ज्ञानार्जनं करोति, तर्हि कदापि तस्य पद्मपुष्पस्य ज्ञानं न सम्भवेत्। कारणं हि कुमुदिनीपुष्पे कुमुदिन्याः वैशिष्ट्यं तथा नामजात्याद्युपाधीनां समावेशोऽस्ति न तु पद्मपुष्पस्य। अत एव वस्तुनः प्रत्यक्षसमये केवलं तस्य रूपाकारं प्रत्यक्षीभूतं न भवेत्, अपि तु तस्य नाम-जाति-गुण-क्रियादीनामपि प्रत्यक्षं भवेत्। तदुक्तं-

अर्थादेवेति रूपादेस्तत एवेति नान्यतः।
अन्यथा घटविज्ञानमन्येन व्यपदिश्यते॥ [12]

मूल्यायनम्

परिशेषे वक्तुं शक्यते यत्, भामहाचार्यैः प्रतिज्ञाहीनं हेतुहीनं दृष्टान्तहीनं चेति दोषत्रयं न्यायदर्शनदिशा निरूपितम्। तन्मते न्यायदर्शने यथा प्रतिज्ञादिन्यायावयववाक्यानि विना अनुमानस्य स्वरूपं व्याख्यातुं न शक्यते तथैव काव्येऽपि प्रतिज्ञाहेतुदृष्टान्तानां विहाय काव्यस्य परिपूर्णत्वरूपं न सिद्धति। वस्तुतः दोषतत्त्वनिरूपणाय भामहैः सविकल्पकप्रत्यक्षं स्वीकृतम्। तथाहि तेन बौद्धानाम् प्रत्यक्षलक्षणं खण्डितम्। यतः बौद्धाः सविकल्पकप्रत्यक्षं नाङ्गीकुर्वन्ति। बौद्धनये प्रत्यक्षं नाम कल्पनारहितम् अर्थात् नामजातिरूपादिरहितम् स्यात्। अत्रैव भामहानामापत्तिः। तन्मते यदि नामजात्यादिरहितेन वस्तुनः स्वरूपं निर्णीतं स्यात् तर्हि नामजात्यादिविशिष्टपदार्थस्य ज्ञानं केनोपायेन सम्भवेत्? अपि च रामश्यामयोर्मध्ये भेदः केन प्रकारेण सम्भेवत्? एतदर्थमेव भामहाचार्यैः बौद्धमतं खण्डयित्वा न्यायमतमनुसृत्य चतस्रः युक्तयः प्रदर्शिताः। तत्तु मयालोचितम् प्रबन्धे। वस्तुतः

तन्मते कल्पनायुक्तस्य वस्तुनः ज्ञानं सविकल्पकप्रत्यक्षप्रमाणेन हि भवेदिति शम्।

## Sources:

1. Annambhatta, *Tarkasamgrha,* Ed. Narayana Chandra Goswami, P-282.
2. Varadaraja, *Tarkikaraksha,* Ed. V.P. Dvevedi, P-56.
3. प्रत्यक्षमनुमा च ते। असाधारणसामान्यविषयत्वं तयोः किल॥ (५/५), *Kavyalamkara.*
4. *Kavyalamkara,* 5/6
5. *Ibid,* 4/1-2
6. *Nyayavindu,* P-11
7. *Ibid,* P-14
8. Jayanta Bhatta, *Nyayamanjari,* Ed. Amit Bhattacharjee, P-444.
9. *Kavyalamkara,* 5/7
10. *Ibid,* 5/8
11. *Ibid,* 5/9
12. *Ibid,* 5/10

## Bibliography:


- Banahatti, Narayan. *The Kavyaprakasha of Mammatacharya with the Jhalkikara & Balabodhini commentaries*. Delhi: Parimal Publications, 2008(Reprint).
- Bhamaha. *Kavyalamkara.* Ed. Dr. Ramananda Sharma. Varanasi: Chaukhamba Sanskrit Series Office, 2013. Print.
- Bhattacharya, Bishnupada. *Kavyamimamsa*. Kolkata: Jijnasa Publications Ltd., 1982. PDF.
- Bharadvaja Uddyotkar. *Nyayabhasyavartika.* Ed. Anantalal Thakur. New Delhi: Indian Council of hilosophical Research, 1997. PDF
- Dharmakirti. *Nyayavindu.* Ed. Satyajyoti Chakraborty. Kolkata: Sahityashree, 2021. Print.
- Dingnag. *Pramanasamuccaya(Pratyakshapariccheda).* Ed. H.R. Rangaswamy Iyengar. Mysore: Printed at the Government Branch Press, 1930. PDF
- Gautam. *Nyayadarsana(First Part).* Ed. Phanibhusan Tarkavagisha. Kolkata: Paschimabanga Rajya Pustak Parshad, 2012. Print.

- Jayanta Bhatta. *Nyayamanjari.* Ed. Amit Bhattacharjee. Kolkata: Sanskrit Pustak Bhandar, 2006. Print.
- Mukhopadhyaya, Sri Siddheswar. *Bhamaha-Dandinoh Saparichaya-samaya-nirupanam.* Calcutta: Sanskrit Sahitya Parishat, 1987. Print.
- Roy, Kakali. *Bhamahakrita Kavyalankara mein nirupita nyayadosha.* New Delhi: Sanjoy Prakashan, 2008. Print.
- Sastri, Shankar Ram. *Kavyalankara of Bhamaha*. Madras: Sri Balamanorama Press, 1956. PDF.
- Tatacharya, Ramanuja. *Tarkasamgrahadipikaprakasika.* Madrapuri: Madrapuri Visvavidyalaya, 1980(First Edition).
- Varadaraja *Tarkikaraksha (sarasamgrahaabhidhavyakhyasahita).* Ed. V.P. Dvivedi. Varanasi: Medical Hall Mantralaya, 1995. PDF.


❋ ❋ ❋